# Kalpandrishtipujastuti Stotram

# कल्पान्दृष्टिपूजास्तुतिस्तोत्रम्

## Document Information

Text title : Kalpandrishtipujastuti Stotram

File name : kalpAndRRiShTipUjAstutistotraM.itx

Category : devii, devI, dashamahAvidyA, pUjA, panchadashI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : panchadashIstavarAjamAlikA compiled by Lalitha Ramani

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

# कल्पान्दृष्टिपूजास्तुतिस्तोत्रम्

(श्रीषोडशोपचार मानसिकमन्त्रोक्तविधिना देवतास्तुतिः)

श्रीगणेशाय नमः ।
ॐ क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्रीं ।

कल्याणोज्वलकार्मुकानिक्तकलानन्देनमन्दस्मितां
कारुण्याङ्कुशपञ्चबाणकलितां कन्दर्पदर्पोज्ज्वलाम् ।
काम्याकर्षण दिव्यपाशाभरितां बालार्ककोटिप्रभां
आदिक्षान्ततनुत्रयां त्रिनयनांऽप्रायेच्छिवां शाम्भवीम् ॥ १॥

एकाकारतया प्रपञ्चभरितामेकान्तसञ्चारिणीं
एणीकाज्वलसंविदाम्परकलामेणामबिम्बां पराम् ।
एकोदेव इति प्रसिद्धमनुभिः प्राख्यात चिन्मातृकां
एकाराङ्कित बैन्दवी परशिवामेकाक्षरीमाहुवे ॥ २॥

ईशानादि महेन्द्ररुद्रपरिषद् ब्रह्मादिपादोन्नता
लङ्काराङ्कितदिव्यरत्नविलसत् सिंहासनेसुस्थिराम् ।
ईषद्भक्तितया त्वदीय चरणाम्भोजार्चनोदीप्तवान्
इच्छाज्ञानक्रियात्मकासनमिदं गृह्णातुते शाम्भवम् ॥ ३॥

लक्षाज्ञानमयं सुधार्णवजलेनापूर्यपात्रार्पितं
लाक्षालङ्कृतपादपङ्कजयुगेसङ्क्षोभ्यभक्त्यापुनः ।
लक्ष्मीरञ्जितहेमधामकलशेनापूर्यशीताम्बुना-
स्वा चामार्थमिदं प्रकल्पितमदे गृह्णत्वं हे शाम्भवी ॥ ४॥

ह्रीङ्कारोज्वलवर्णकल्पितकलालङ्कारसिंहासने
ह्रीङ्कारादिसमस्तसिद्धकलनैः संस्तूयमाने मुदा ।
गाङ्गं चन्द्रसचन्दनं हिमजले सस्यानिजानेक्षती
मातर्देवि कृपां कुरुत्वमधुना स्नानेत्वमङ्गीकुरु ॥ ५॥

हव्यागूढतनुप्रकाशसुभगे क्षौमाम्बरो भक्तिते
हंसस्फाटिकचन्द्रिकाभिरमलं तन्वोत्तुरीमांसिसम् ।
हारालङ्कृतपीवरस्तनभरामानन्दमन्दस्मिता
हव्यातीतमथामनङ्ग विभवामाराधयामाम्बिकाम् ॥ ६॥

सौवर्णोज्वलरत्नकुण्डलधरां सौभाग्यनासामणि
सान्द्रानन्दकरीप्रसिद्धमणिभिः सोहङ्किरीटंशुभम् ।
सर्वालङ्कृतबाहुदण्डयुगल ग्रैवेयहारान् बहून्
सल्लोपाचित हारनूपुरयुगं गृह्णातुते शाम्भवी ॥ ७॥

कस्तूरिघनसारकुङ्कुमरजोगन्धोत्कटश्चन्दनं
कर्पूरच्छवि हारकाभिरमलं भक्त्यासमर्प्याक्षतैः ।
कल्हारोज्वलजातिपङ्कजरजः पद्मैश्चसौकेतकी
वनमल्लिका कल्पवृक्षकुसुमैरभ्यर्चवामीश्वरीम् ॥ ८॥

हाहाकाररवप्रसिद्धकलता हाकारहन्तात्मकं
भूयोदेवि हि कल्पयामि सततं ब्रह्मेन्द्रवन्द्येशिवे ।
हम्बीजार्ध कलात्मिकां तविभवेमल्यादिचक्राङ्किते
हारिद्राङ्कितहेमधामकलशे गृह्णीष्वदीयम्महत् ॥ ९॥

लम्बीजाङ्कितसिद्धमार्गसहजैर्द्रव्यैरनन्तैर्मुदा-
लङ्काराङ्कितवह्निभानुशशिभिः पात्रसुधापूरितैः ।
लिप्तामोद मारीचिहिङ्गुसुरभिः युक्तैस्तुभक्तैः सदा
लक्ष्मीश्चक्रनिवासिनीं कमलनीं सन्तर्पयामीश्वरीम् ॥ १०॥

ह्रीङ्कारत्रयवर्णपीठनिलये ह्रीङ्कारमन्त्रात्मिके
ह्रीङ्कारोज्वल हेमधामचषकेसिद्यन्नभक्षान् वहन् ।
ह्रींश्रीङ्कल्पितकामधेनुनियतः क्षीराज्यमध्वास्यत
ह्रीङ्कारेण निवेदयामि सततं ह्रीङ्कारनादप्रिये ॥ ११॥

सर्वाम्नायपरापरान्तसलिलं सौगन्धगन्धैर्युतं
सौन्दर्यैश्वरवल्लभे परेशिवे गृह्णीयहस्तोदकम् ।
सल्लायाणीवकौतुकामृतरसं सम्पूर्णचन्द्रप्रभं
सत्करहारयुतं गृहाण वरदे ताम्बूलमव्यास्यतम् ॥ १२॥

कादिक्षान्तस्वरादिवर्णमणिभिः सङ्कीर्णदीपाङ्कुरां
कालैकत्रयपञ्चसप्तरवकनैवर्णपात्रैमुदा ।

काव्यालङ्कृत नाटकाविश्रुतिभिः सङ्गीतनृत्यैमुहुः
कल्लोलान्तमिदङ्गृहाणवरदे नीराजनन्निर्मलम् ॥ १३॥

लावण्याङ्गदैमदीयपञ्चकमिदं सन्मार्गमार्गादयं
छत्रञ्चामरदर्पणं चमजनं दत्वाशिवेश्रादरात् ।
लीलापूजितपादपङ्कजयुगे सम्पूज्यगन्धाक्षतैः
लक्ष्मीरञ्जितपादुका तु विभवां सन्तर्पयामीश्वरीम् ॥ १४॥

ह्रीङ्कारीशिवतत्वमय्यनिलयां ह्रीङ्कारमन्त्रात्मिकां
ह्रीङ्कारत्रयवाग्भवादिमनुभिः संशोध्यतत्वञ्चयः ।
त्र्कादिसहादिकादिमनुभिर्मत्वापुनःशाम्भवीं
स्तुत्वा शङ्करवल्लभां त्रिनयनामुद्भासयामीकरीम् ॥ १५॥

वन्देशपादार्वितदृष्टिमुमयानिमाल्यविजार्चिविधासमर्थः
दुःखावलीक्षेत्रपतेप्रवक्ष्य विश्रामये भक्तिजनैर्मुहुर्मुदा ॥ १६॥

ध्यानावाहनमासनार्च्यकमिदं स्नानाम्बुकं भूषणं
गन्धञ्चाक्षतपुष्पधूपममलं ज्योतिं च नैवेद्यकम् ।
ताम्बूलार्घ्यकच्छत्रचामरयुगं रत्नोज्वलन्दर्पणं
मापूरव्यजनम्प्रदक्षिणशतं नमस्कारान् गृहाणाम्बिके ॥ १७॥

कल्याणस्तुतिमेतदीयममलं ह्रीङ्कारमन्त्रात्मकं
सर्वाम्नायकरं महत्कविजनोलङ्कारह्रीङ्कारदम् ।
सर्वज्ञादिसमस्तसिद्धकमलै संस्तूयमानैर्मुदा
भक्त्यास्तोत्रमिदं पठेत् प्रतिदिनं ह्रीङ्कारमेतिक्षणत् ॥ १८॥

इति श्रीरुद्रयामले उमामहेश्वरसंवादे
कल्पान्दृष्टिपूजास्तुतिस्तोत्रं समाप्तम् ।

Proofread by Rajesh Thyagarajan

*Kalpandrishtipujastuti Stotram*

pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*